अध्याय 6: सौहार्दं प्रकृतेः शोभा

विषय-सूची

7 प्रश्नावली · 17 प्रश्न

प्रश्नावली 1	एकपदेन उत्तरं लिखत	1 प्रश्न
प्रश्नावली 2	अधोलिखितप्रश्नानामुत्तराणि पूर्णवाक्येन लिखत	7 प्रश्न
प्रश्नावली 3	रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत	5 प्रश्न
प्रश्नावली 4	शुद्धकथनानां समक्षम् आम् अशुद्धकथनानां च समक्षं न इति लिखत	1 प्रश्न
प्रश्नावली 5	मञ्जूषातः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत	1 प्रश्न
प्रश्नावली 6	वाच्यपरिवर्तनं कृत्वा लिखत	1 प्रश्न
प्रश्नावली 7	समासविग्रहं समस्तपदं वा लिखत	1 प्रश्न

प्रश्नावली 1 — एकपदेन उत्तरं लिखत

प्रश्न 1

(क) वनराजः कैः दुरवस्था प्राप्तः? (ख) कः वातावरणं कर्कशध्वनिना आकुलीकरोति? (ग) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते? (घ) कः आत्मानं बलशाली, विशालकायः, पराक्रमी च कथयति? (ङ) बकः कीदृशान् मीनान् क्रूरतया भक्षयति?

हल

एकपदेन (एक शब्द में) उत्तर नाटक के कथानक के आधार पर दिए गए हैं।

उत्तर: (क) तुच्छजीवैः (ख) काकः (ग) आदर्शः (घ) गजः (ङ) वराकान्

प्रश्नावली 2 — अधोलिखितप्रश्नानामुत्तराणि पूर्णवाक्येन लिखत

प्रश्न 1

नि:संशयं कः कृतान्तः मन्यते?

हल

पूर्णवाक्येन उत्तरम्।

उत्तर: यः अपरैः वित्रस्तान् पीड्यमानान् जन्तून् सदा न रक्षति पार्थिवरूपेण स: निसंशय कृतान्तः मन्यते।

प्रश्न 2

बकः वन्यजन्तूनां रक्षोपायान् कथं चिन्तयितुं कथयति?

हल

पूर्णवाक्येन उत्तरम्।

उत्तर: बकः शीतले जले बहुकाल पर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञः इव स्थित्वा वन्यजन्तूनां रक्षोपायान् चिन्तयितुं कथयति।

प्रश्न 3

अन्ते प्रकृतिमाता प्रविश्य सर्वप्रथमं किं वदति?

हल

पूर्णवाक्येन उत्तरम्।

उत्तर: अन्ते प्रकृतिमाता प्रविश्य सर्वप्रथमं वदति यत् सर्वे जीवाः एव तस्याः सन्ततिः। कथं मिथः कलहं कुर्वन्ति। सर्वे जीवाः अन्योन्यश्रिताः सन्ति।

प्रश्न 4

यदि राजा सम्यक् न भवति तदा प्रजा कथं विप्लवे?

हल

पूर्णवाक्येन उत्तरम्।

उत्तर: यदि राजा सम्यक् न भवति तदा राजा जलधौ अकर्णधारा नौरिव विप्लवेत्।

प्रश्न 5

मयूरः कथं नृत्यमुद्रायां स्थितः भवति?

हल

पूर्णवाक्येन उत्तरम्।

उत्तर: मयूरः पिच्छान् उद्घाट्य नृत्यमुद्रायां स्थितः भवति।

प्रश्न 6

अन्ते सर्वे मिलित्वा कस्य राज्याभिषेकाय तत्पराः भवति?

हल

पूर्णवाक्येन उत्तरम्।

उत्तर: अन्ते सर्वे मिलित्वा उलूकस्य राज्याभिषेकाय तत्पराः भवति।

प्रश्न 7

अस्मिन्नाटके कति पात्राणि सन्ति?

हल

पूर्णवाक्येन उत्तरम्।

उत्तर: अस्मिन् नाटके दश पात्राणि सन्ति।

प्रश्नावली 3 — रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत

प्रश्न 1

सिंहः वानराभ्यां स्वरक्षायाम् असमर्थः एवासीत्। (रेखांकित: स्वरक्षायाम्)

हल

रेखांकित पद के आधार पर प्रश्न निर्माण।

उत्तर: सिंहः वानराभ्याम् कस्याम् असमर्थः एवासीत्?

प्रश्न 2

गजः वन्यपशून् तुदन्तं शुण्डेन पोथयित्वा मारयति। (रेखांकित: शुण्डेन)

हल

रेखांकित पद के आधार पर प्रश्न निर्माण।

उत्तर: गजः वन्यपशून् तुदन्तं केन पोथयित्वा मारयति?

प्रश्न 3

वानरः आत्मानं वनराजपदाय योग्यः मन्यते। (रेखांकित: वनराजपदाय)

हल

रेखांकित पद के आधार पर प्रश्न निर्माण।

उत्तर: वानरः आत्मानं कस्मै योग्यः मन्यते?

प्रश्न 4

मयूरस्य नृत्यं प्रकृतेः आराधना। (रेखांकित: प्रकृतेः)

हल

रेखांकित पद के आधार पर प्रश्न निर्माण।

उत्तर: मयूरस्य नृत्यं कस्याः आराधना?

प्रश्न 5

सर्वे प्रकृतिमातरं प्रणमन्ति। (रेखांकित: प्रकृतिमातरं)

हल

रेखांकित पद के आधार पर प्रश्न निर्माण।

उत्तर: सर्वे काम् प्रणमन्ति?

प्रश्नावली 4 — शुद्धकथनानां समक्षम् आम् अशुद्धकथनानां च समक्षं न इति लिखत

प्रश्न 1

(क) सिंहः आत्मानं तुदन्तं वानरं मारयति। (ख) का-का इति बकस्य ध्वनिः भवति। (ग) काकपिकयोः वर्णः कृष्णः भवति। (घ) गजः लघुकायः, निर्बलः च भवति। (ङ) मयूरः बकस्य कारणात् पक्षिकुलम् अवमानितं मन्यते। (च) अन्योन्यसहयोगेन प्राणिनाम् लाभः जायते।

हल

शुद्ध कथन के समक्ष 'आम्' तथा अशुद्ध कथन के समक्ष 'न' लिखा गया है।

उत्तर: (क) न (ख) न (ग) आम् (घ) न (ङ) न (च) आम्

प्रश्नावली 5 — मञ्जूषातः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत

प्रश्न 1

मञ्जूषा- स्थितप्रज्ञः, यथासमयम्, मेध्यामेध्यभक्षकः, अहिभुक्, आत्मश्लाघाहीनः, पिकः। (क) काकः ..... भवति। (ख) ..... परभृत् अपि कथ्यते। (ग) बकः अविचल: ..... इव तिष्ठति। (घ) मयूरः ..... इति नाम्नाऽपि ज्ञायते। (ङ) उलूक : ..... पदनिर्लिप्तः चासीत्। (च) सर्वेषामेव महत्त्वं विद्यते .....।

हल

मञ्जूषा से समुचित पद चुनकर रिक्त स्थान भरे गए हैं।

उत्तर: (क) काक: मेध्यामध्यभक्षकः भवति। (ख) पिकः परभृत् अपि कथ्यते। (ग) बकः अविचलः स्थितप्रज्ञः इव तिष्ठति। (घ) मयूरः अहिभुक् इति नाम्नाऽपि ज्ञायते। (ङ) उलूक: आत्मश्लाघाहीनः पदनिर्लिप्तः चासीत्। (च) सर्वेषामेव महत्त्वं विद्यते यथासमयम्।

प्रश्नावली 6 — वाच्यपरिवर्तनं कृत्वा लिखत

प्रश्न 1

उदाहरणम्- क्रुद्धः सिंहः इतस्ततः धावति गर्जति च। → क्रुद्धेन सिंहेन इतस्ततः धाव्यते गर्यते च। (क) त्वया सत्यं कथितम्। (ख) सिंहः सर्वजन्तून् पृच्छति। (ग) काकः पिकस्य संततिं पालयति। (घ) मयूरः विधात्रा एव पक्षिराजः वनराजः वा कृतः। (ङ) सर्वैः खगैः कोऽपि खगः एव वनराजः कर्तुमिष्यते स्म। (च) सर्वे मिलित्वा प्रकृतिसौन्दर्याय प्रयत्नं कुर्वन्तु।

हल

वाच्य-परिवर्तन करके वाक्य लिखे गए हैं।

उत्तर: (क) त्वम् सत्यं कथयसि। (ख) सिंहेन सर्वजन्तवः पृच्छ्यन्ते। (ग) काकेन पिकस्य सन्ततिः पालयते। (घ) विधाता मयूरम् एव पक्षिराज वनराजं वा अकरोत्। (ङ) सर्वे खगाः कम् अपि खगं वनराजं कर्तुम्-ऐच्छन्। (च) सर्वैः मिलित्वा प्रकृतिसौन्दर्याय प्रयत्नः क्रियते।

प्रश्नावली 7 — समासविग्रहं समस्तपदं वा लिखत

प्रश्न 1

(क) तुच्छजीवैः .....। (ख) वृक्षोपरि .....। (ग) पक्षिणां सम्राट् .....। (घ) स्थिता प्रज्ञा यस्य सः .....। (ङ) अपूर्वम् .....। (च) व्याघ्रचित्रका .....।

हल

समास-विग्रह अथवा समस्त पद लिखे गए हैं।

उत्तर: (क) तुच्छैः जीवैः (ख) वृक्षस्य उपरि (ग) पक्षिसम्राट (घ) स्थितप्रज्ञः (ङ) न पूर्वम् (च) व्याघ्रः च चित्रकः च